# A-II/1/2395/22

## चतुर्थसत्रार्द्धम्

## प्रथमपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. तत्त्वसंग्रहस्य पञ्जिकाकारः कः?

2. तत्त्वसंग्रहस्य परिच्छेदानां का संज्ञा?

3. पाठ्यग्रन्थस्य मङ्गलपद्यं लिखत।

4. आचार्यशान्तरक्षितः केन महाविहारेण सम्बद्धः आसीत्?

**अथवा**

तिब्बतदेशस्य प्रथमबौद्धविहारस्य नाम किम्?

5. आचार्यकमलशीलस्य गुरोर्नाम किम्?

6. आचार्यशान्तरक्षितः कस्य बौद्धदर्शनसम्प्रदायस्य उद्भावकः?

**अथवा**

शब्दार्थपरीक्षायाः पूर्वपक्षस्य आचार्यद्वयस्य नाम लिखत।

7. शब्दस्य अर्थेन सह सम्बन्धः भवति न वा? बौद्धदिशा सूचयत।

8. अपोह एव शब्दार्थः इति के मन्यन्ते?

9. अपोहस्य भेदान् लिखत।

10. स्वलक्षणं कस्य विषयः?

11. अनुमानप्रमाणस्य विषयः कः?

**अथवा**

तत्त्वसंग्रहे कति प्रमेयाणि? नामानि लिखत।

12. उद्योत्करः केन दर्शनसम्प्रदायेन सम्बद्धः? तत्त्वसंग्रहदिशा सूचयत।

**अथवा**

तत्त्वसंग्रहमते जातिः स्वीक्रियते न वा?

13. नैयायिकानां मते जातिः नित्या अनित्या वा? सूचयत।

**अथवा**

शान्तरक्षितदिशा द्रव्यस्य गुणस्य च सिद्धिः संभवति न वा? सूचयत।

14. कल्पना का?

15. अतद्व्यावृत्तिः का? अनया कस्य सिद्धिः जायते? तत्त्वसंग्रहदिशा सूचयत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. स्वस्मृत्या पाठ्यांशतः एकां कारिकां विलिख्य सप्रसंगं व्याख्या विधेया। सा कारिका प्रश्नपत्रेऽस्मिन् नागता स्यात्।

17. सप्रसंगं व्याख्या कार्या –

यथासंकेतमेवातोऽसङ्कीर्णार्थाभिधायिनः। शब्दा विवेकतो वृत्ताः पर्याया न भवन्ति नः॥

18. सप्रसंगव्याख्यां कुरुत –

ताश्च व्यावृत्तयोऽर्थानां कल्पनामात्रनिर्मिताः। नापोह्याधारभेदेन भिद्यन्ते परमार्थतः॥

**अथवा**

शब्दार्थः किमपोहो वा विधिर्वेति निरूपणे। अपोह इति भात्येतद्यत्तदेव प्रतीयते॥

19. सप्रसंगव्याख्या विधेया –

एकप्रत्यवमर्शे हि केचिदेवोपयोगिनः। प्रकृत्या भेदवत्त्वेऽपि नान्य इत्युपपादितम्॥

**अथवा**

तथाऽसौ नास्ति तत्त्वेन यथाऽसौ व्यवसीयते। तन्न भावो न चाभावो वस्तुत्वेनावसायतः॥

20. सप्रसंगं व्याख्येयम् –

असद्रूपं तथा चेदं न शब्दादिस्वलक्षणम्। इत्थं निर्दिष्टभेदेन भवत्येवान्वयोऽमुना॥

**अथवा**

तिमिरोपहताक्षो हि यथा प्राह शशिद्वयम्। स्वसमाय तथा सर्वा शाब्दी व्यवहृतिर्मता॥

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. शब्दार्थपरीक्षायाः सारं लिखत।

**अथवा**

तत्त्वसंग्रहकारस्य व्यक्तित्वं कृतित्वं च विवेचयत।

# A-II/2/2396/22

## द्वितीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. सौगतनैयायिकाः कति प्रमाणानि स्वीकुर्वन्ति? कानि च तानि?
2. प्रमाणवार्तिकग्रन्थोऽयं कस्य ग्रन्थस्य वार्तिकम्?
3. पञ्चोपादानस्कन्धाः के?

**अथवा**

स्वसंवेदनं किम्?

4. बौद्धप्रत्यक्षप्रमाणस्य लक्षणं किम्? पाठ्यग्रन्थदिशा लिखत।
5. का नाम कल्पना? बौद्धदिशा सूचयत।
6. शाब्दं ज्ञानं प्रमाणम् अप्रमाणं वा? पाठ्यग्रन्थदिशा लिखत।

**अथवा**

मानसप्रत्यक्षस्य लक्षणं किम्? पाठ्यग्रन्थदिशा लिखत।

7. प्रमाणवार्तिके कति परिच्छेदाः? नामानि लिखत।
8. प्रत्यक्षप्रमाणविषयः कः?

**अथवा**

अविसंवादनं किम्? ग्रन्थदिशा लिखत।

9. प्रमाणवार्तिकस्य मङ्गलपद्यं लिखत।
10. योगिप्रत्यक्षस्य लक्षणं किम्? पाठ्यग्रन्थदिशा लिखत।
11. प्रमाणवार्तिककारस्य अपरे ग्रन्थाः के? नामानि लिखत।

**अथवा**

प्रमाणवार्तिकस्योपरि वार्तिकालङ्कारभाष्यं केन लिखितम्?

12. सुगतः कः? बौद्धदिशा सूचयत।

13. नैरात्म्यज्ञानं कतिविधम्? नामानि लिखत।

**अथवा**

प्रमाणसमुच्चयकारः कः?

14. प्रत्यक्षप्रमाणं कतिविधम्? पाठ्यग्रन्थदिशा लिखत।

15. बौद्धमते प्रमेयानि कति? नामानि लिखत।

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. प्रमाणवार्तिकस्य कारिकामेकां विलिख्य तस्याः व्याख्या कार्या।

17. सप्रसङ्गं व्याख्येयम् –

अर्थक्रियासमर्थं यत् तदत्र परमार्थसत्। अन्यत् संवृत्तिसत् प्रोक्तं ते स्वसामान्यलक्षणे॥

**अथवा**

सन्धीयमानं चान्येन व्यवसायं स्मृतिं विदुः। तल्लिङ्गापेक्षणान्नो चेत् स्मृतिर्न व्यभिचारतः॥

18. अधीतग्रन्थदिशा प्रत्यक्षप्रमाणं विवेचयत।

19. व्याख्या कार्या –

सामान्याश्रयसंसिद्धौ सामान्यं सिद्धमेव तत्। तदसिद्धौ तथास्यैव ह्यनुमानं प्रवर्तते॥

**अथवा**

मानं द्विविधं मेयद्वैविध्यात् शक्त्यशक्तितः। अर्थक्रियायां केशादिर्नार्थोऽनर्थादिमोक्षतः॥

20. सप्रसङ्गं व्याख्यात–

न प्रत्यक्षपरोक्षाभ्यां मेयस्यान्यस्य सम्भवः। तस्मात् प्रमेयद्वित्वेन प्रमाणद्वित्वमिष्यते॥

**अथवा**

सदृशासदृशत्वाच्च विषयाविषयत्वतः। शब्दस्यान्यनिमित्तानां भावे धीसदसत्त्वतः॥

**स. एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. प्रमाणवार्तिकस्य प्रत्यक्षपरिच्छेदस्य प्रतिपाद्यविषयः कः? विवृणुत।

**अथवा**

न्यायक्षेत्रे आचार्यधर्मकीर्तेः अवदानमधिकृत्य निबन्धमेकं लिखत।

**अथवा**

प्रमाणवार्तिकग्रन्थस्य महत्त्वं प्रतिपादयत।

# A-II/3/2397/22

## चतुर्थसत्रार्द्धम्

## तृतीयम्पत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. अतिलघूत्तरीयाः प्रश्नाः। सर्वे समाधेयाः।** **(15×2=30)**

1. कति अव्याकृतवस्तूनि भगवता बुद्धेन निर्दिष्टानि?
2. माध्यमिककारिकाकारस्य कः कर्ता? किञ्च ग्रन्थस्य अस्योपरि चन्द्रकीर्तिविरचितवृत्तेः नाम?
3. अपरान्तं समुपाश्रिताः चतस्रो दृष्टयः काः?
4. माध्यमिकदर्शनस्य नामापरं किम्? कश्च दर्शनस्य अस्य प्रवर्तकः?
5. आवरणद्वयं लिखत।

**अथवा**

माध्यमिकमते तथागतः सस्वभावो निःस्वभावो वा?

6. पञ्चोपादानस्कन्धान् लिखत।
7. सर्वदृष्टिप्रहाणाय................इति कारिकेयं पूरयितव्या?
8. आवरणद्वयं लिखत।
9. माध्यमिककारिकायां कति परिच्छेदाः सन्ति? किञ्च सप्तविंशतितमस्य परिच्छेदस्य नाम?
10. आर्यसत्यपरीक्षा इति कस्य प्रकरणस्य प्रतिपाद्यविषयः?

**अथवा**

नैरात्म्यद्वयं लिखत।

11. माध्यमिकमते जगतः सांवृतिकी सत्ता विद्यते न वा?
12. 'एवं त्रीण्यपि रत्नानि ब्रुवाणः प्रतिबाधसे' इत्यत्र उक्तानि त्रीणि रत्नानि कानि?

**अथवा**

चत्वारि आर्यफलानि कानि?

13. कम् अनाश्रित्य परमार्थो न दृश्यते?

**अथवा**

प्रज्ञाभेदान् लिखत।

14. चत्वारि सौगतदर्शनप्रस्थानानि कानि?

15. यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे।

.......................इति कारिकां पूरयत?

**अथवा**

नैरात्म्यवादः कः?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. तथागतपरीक्षायाः प्रतिपाद्यविषयः कः? विवृणुत।

**अथवा**

अधीतग्रन्थनयेन सत्यद्वयं विवेचनीयम्।

17. स्कन्धा न नान्यः स्कन्धेभ्यो नास्मिन् स्कन्धा न तेषु सः।

तथागतः स्कन्धवान्न कतमोऽत्र तथागतः॥ –अस्याः कारिकायाः सन्दर्भसहिता व्याख्या विधेया।

18. सर्वं च युज्यते तस्य शून्यता यस्य युज्यते।

सर्वं न युज्यते तस्य शून्यं यस्य न युज्यते॥ –कारिकेयं ग्रन्थानुसारं साधु व्याख्यायताम्।

19. मध्यमः मार्गः कः? विवृणुत।

**अथवा**

अप्रतीत्य समुत्पन्नो धर्मः कश्चिन्न विद्यते।

यस्मात् तस्मादशून्यो हि धर्मः कश्चिन्न विद्यते॥ –कारिकेयं साधु व्याख्येया।

20. अन्तवान् यदि लोकः स्यात् परलोकः कथं भवेत्।

अथाप्यनन्तवांल्लोकः परलोकः कथं भवेत्॥

–कारिकेयं ग्रन्थानुसारं साधु व्याख्यायताम्।

**अथवा**

अधीतग्रन्थदिशा अव्याकृतानि वस्तूनि लिखत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. माध्यमिकदृष्ट्या अनात्मवादः विवेचनीयः।

**अथवा**

माध्यमिककारिकाकारस्य व्यक्तित्वं कृतित्वञ्च लिखत।

**अथवा**

भारतीयदर्शनसम्प्रदायेषु माध्यमिकदर्शनस्य अवदानं विविच्यताम्।

# A-II/4/2398/22

## चतुर्थसत्रार्द्धम्

## चतुर्थम्पत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. अतिलघूत्तरीयाः प्रश्नाः। सर्वे समाधेयाः।** **(15×2=30)**

1. 'बोधिचर्यावतारः' इत्यत्र 'बोधि' इत्यस्य पदस्य कोऽभिप्रायः?
2. सौगताः जगतः सृष्टिकर्तृरूपेण ईश्वरं स्वीकुर्वन्ति न वा?
3. सांख्याः लोकस्य कारणं किम् इच्छन्ति?
4. बौद्धाः सत्कार्यवादं खण्डयन्ति मण्डयन्ति वा?
5. बोधिचर्यावतारस्य मङ्गलवाक्यं लिखत।

**अथवा**

प्रज्ञादृष्ट्या द्वे अन्ते के?

6. माध्यमिकमतानुसारं संसारात् निर्वाणं भिन्नम् अभिन्नं वा?
7. अतिदुर्लभः कः?

**अथवा**

कति सौगतदर्शनसम्प्रदायाः? के च ते?

8. सम्भारद्वयं लिखत।
9. करादिषु कायबुद्धिः कस्मात् जायते?

**अथवा**

यावत्प्रत्ययसामग्री तावत् कः?

10. बोधिचर्यावतारस्य पञ्जीकाकारः कः?
11. 'पारमिता' इत्यस्य पदस्य कोऽर्थः?
12. माध्यमिकाः भावानां स्वतः उत्पत्तिवादं खण्डयन्ति मण्डयन्ति वा?

**अथवा**

बोधिचर्यावतारस्य परिच्छेदसंख्यां विलिख्य नवमपरिच्छेदस्य नामोल्लेखं कुरुत।

13. माध्यमिकाः स्वसंवेदनं स्वीकुर्वन्ति न वा?

14. बोधिचर्यावतारग्रन्थोऽयं सूत्रं शास्त्रं वा?

**अथवा**

चत्वारि स्मृत्युपस्थानानि कानि?

15. माध्यमिकदर्शनस्य प्रवर्तकः कः? किञ्चास्य अपरं नाम?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. कायानुस्मृत्युपस्थानं ग्रन्थोक्तदिशा प्रतिपादनीयम्।

17. इमं परिकरं सर्वं प्रज्ञार्थं हि मुनिर्जगौ।
तस्मादुत्पादयेत्प्रज्ञां दुःखनिवृत्तिकाङ्क्षया॥ –कारिकेयं ग्रन्थोक्तदिशा साधु व्याख्येया।॥

**अथवा**

यावत्प्रत्ययसामग्री तावत्कायः पुमानिव।
एवं करादौ सा यावत् तावत्कायोऽत्र दृश्यते॥ –कारिकेयं साधु व्याख्येया।

18. संवृतिः परमार्थश्च सत्यद्वयमिदं मतम्।
बुद्धेरगोचरस्तत्त्वं बुद्धिः संवृतिरुच्यते॥ –अधीतग्रन्थदिशा कारिकेयं साधु व्याख्यातव्या।

**अथवा**

बोधिचित्तं विवेचनीयम्।

19. बोधिसत्त्वः कः? विवृणुत।

20. यदा न भावो नाभावो मतेः संतिष्ठते पुरः।
तदान्यगत्यभावेन निरालम्बा प्रशाम्यति॥ –कारिकेयं ग्रन्थानुसारं साधु व्याख्यायताम्।

**अथवा**

एवं न च निरोधोऽस्ति न च भावोऽस्ति सर्वदा।
अजातमनिरुद्धं च तस्मात्सर्वमिदं जगत्॥

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. बोधिचर्यावतारस्य परिच्छेदस्य सारो लेख्यः।

**अथवा**

बोधिचर्यावतारग्रन्थस्य अवदानं महत्त्वं च लेखनीयम्।

**अथवा**

बोधिचर्यावतारकारस्य देशकालकृतीनां परिचयपूर्वकं माध्यमिकर्शनक्षेत्रे तस्यावदानं सम्यक्तया प्रतिपाद्यताम्।

# A-II/5/2399/22

## चतुर्थसत्रार्द्धम्

## पंचमपत्रम्

## बौद्धदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. 'दु:खसमुदय:' इति पदे 'समुदयस्य' कोऽर्थ: ?
2. त्रिपिटकम् किम्? नामानि लिखत।
3. अभिधम्मपिटके कति ग्रन्था:? सूचयत।
4. आचार्यनागार्जुनस्य सम्प्रदाय: क:?
5. 'शून्यतासप्तति:' इति ग्रन्थस्य रचनाकार: क:?
6. धम्मपद: कस्य पिटकस्य ग्रन्थोऽस्ति?

**अथवा**

पाराजिक: कस्य पिटकस्याङ्गभूत:?

7. भगवत: बुद्धस्य महापरिनिर्वाणं कुत्र जातम्?
8. प्रथमधर्मचक्रप्रवर्तनं कुत्र संजातम्?

**अथवा**

द्वितीयधर्मचक्रप्रवर्तनं कुत्र संजातम्?

9. 'थेरगाथा' इत्यत्र 'थेर' शब्दस्य कोऽर्थ:?

**अथवा**

कमलशीलस्य गुरोर्नाम किम्?

10. निर्वाणं कतिविधम्?
11. शिक्षासमुच्चयस्य रचनाकार: क:?

**अथवा**

सिद्धार्थस्य उत्पत्ति: कुत्र जाता?

12. ब्रह्मविहाराः कति? नामानि लिखत।

13. अविद्या प्रत्ययात् कः सम्भवति?

14. 'बौद्धधर्मदर्शनम्' इति ग्रन्थस्य रचनाकारः कः?

**अथवा**

तत्त्वसङ्ग्रहकारः कः? कस्य महाविहारस्य आचार्य आसीत्?

15. विज्ञप्तिमात्रतासिद्धिः कस्य आचार्यस्य कृतिः?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. आर्याष्टाङ्गिकमार्गस्य वर्णनं कुरुत।

17. अष्टादश धातवः के? प्रतिपादयत।

18. द्वादशायतनानि कानि? प्रतिपादयत।

**अथवा**

धम्मपदग्रन्थस्य महत्त्वं प्रतिपादयत।

19. बुद्धं सरणं गच्छामि।

धम्मं सरणं गच्छामि।

संघं सरणं गच्छामि॥

–इत्येतेषां त्रिशरणगमनपदानां संस्कृतभाषायां छायाङ्कनं कुरुत।

**अथवा**

वैभाषिकसम्प्रदायस्य वैशिष्ट्यम् प्रतिपादयत।

20. चतुर्थसंगीतेः परिचयो देयः।

**अथवा**

विज्ञानशब्दस्य कोऽर्थः? बौद्धदिशा प्रतिपादयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. शून्यवादः कः? वैशिष्ट्यं प्रतिपादयत।

**अथवा**

थेरवादिनां साहित्यस्य परिचयो देयः।